# Rishikashyapaproktam Bhasmadharanamahimavarnanam

# ઋષિકશ્યપપ્રોક્તં ભસ્મધારણમહિમાવર્ણનમ્

## Document Information

Text title : Rishikashyapaproktam Bhasmadharanamahimavarnanam

File name : RRiShikashyapaproktaMbhasmadhAraNamahimAvarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 9 | 2-37||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# ઋષિકશ્યપપ્રોક્તં ભસ્મધારણમહિમાવર્ણનમ્

(શિવરહસ્યાન્તર્ગતે ભીમાખ્યે)

કાશ્યપઃ (ઉવાચ) ।

ભસ્માભ્યક્તતનુર્નિત્યં પૂજયેદિન્દુશેખરમ્ ।
ભસ્મધારણહીનાનાં પ્રસાદો નૈવ શામ્ભવઃ ॥ ૨॥

ભવેજ્જન્મશતેષ્વેવ દ્વિજસ્યાપિ વિશેષતઃ ।
ભસ્મધારણહીનાનાં જ્ઞાનં નૈવોપજાયતે ॥ ૩॥

જ્ઞાનાઙ્ગત્વદિદં ભસ્મ સૃષ્ટમીશેન મુક્તિદમ્ ।
ભસ્મભસ્મેતિ યો બ્રૂયાત્સ તુ પાપૈઃ પ્રમુચ્યતે ॥ ૪॥

ભસ્મના પાદપર્યન્તં યઃ સ્નાતિ નિયતં સદા ।
સ તુ સન્તરતે ઘોરં સંસારં દુઃખદં નરઃ ॥ ૫॥

દ્વિજો વણિગ્ગૃહસ્થો વા યતિર્વાપિ વનાશ્રમી ।
ત્રિકાલં ભસ્મનિરતો દેવદેવપ્રસાદભાક્ ॥ ૬॥

ભસ્મસ્નાન વિહીનાત્મા કૃત્વા કર્માણ્યપિ દ્વિજઃ ।
નૈવ તત્ફલમાપ્નોતિ કુર્વન્યત્કિઞ્ચિદપ્યસૌ ॥ ૭॥

પ્રત્યવૈતિ દ્વિજો વાપિ ભવત્યેવ ન સંશયઃ ।
ભસ્મપ્રભાવો વેદાન્તૈઃ સર્વદા પ્રતિપાદ્યતે ॥ ૮॥

અથર્વશિરસિ સ્વૈરં ભસ્મ પ્રોક્તં હિ પાવનમ્ ।
શિરોદ્ધતમિદં ભસ્મસ્નાનમાપાદમસ્તકમ્ ॥ ૯॥

અગ્નિરિત્યાદિભિર્મન્ત્રૈઃ સ્નાત્વા પાપૈઃ પ્રમુચ્યતે ।
યો વા કોવાઽન્ત્યજો વાપિ નિત્યં ભસ્મતનુર્ભવેત્ ॥ ૧૦॥

સ મહેશપ્રસાદસ્ય પાત્રં ભવતિ નિશ્ચિતમ્ ।
દ્વિજો વાપ્યુત્તમાચારો ભસ્મસ્નાનવિવર્જિતઃ ॥ ૧૧॥

યો ભસ્મધારિણં દૃષ્ટ્વા નાભિનન્દતિ દુર્મતિઃ ।
તસ્યોત્પત્તૌ ચ સાઙ્કર્યમનુમેયં વિપશ્ચિતા ॥ ૧૨॥

યતિર્વેદાન્તનિષ્ઠોઽપિ નૈવ તદ્જ્ઞાનમાપ્નુયાત્ ।
પઠન્ વા પાઠયન્વાપિ નૈવ તદ્જ્ઞાનમાપ્નુયાત્ ॥ ૧૩॥

જીવાત્મૈક્યં પરં જ્ઞાનં ભસ્મસ્નાનેન જાયતે ।
ભસ્માભ્યક્તતનુર્નિત્યં ત્રિપુણ્ડ્રપરિચિહ્નિતઃ ॥ ૧૪॥

સ તપસ્વી સ દાનાર્હઃ સર્વકર્માર્હકો ભવેત્ ।
ત્રિણેત્રદયયા પાત્રં પવિત્રો ભવતિ ધ્રુવમ્ ॥ ૧૫॥

મિત્રભૂતઃ સુરાણાં ચ ભવત્યેવ ન સંશયઃ ।
ભસ્મધારણહીનો યઃ શિવલિઙ્ગં સમર્ચયેત્ ॥ ૧૬॥

ન તસ્ય પૂજાં ગૃહ્ણાતિ મહાદેવઃ પરાઙ્મુખઃ ।
ભવિષ્યતિ ન સન્દેહઃ પ્રત્યુત પ્રત્યવૈતિ ચ ॥ ૧૭॥

સર્વદા સર્વકાલેષુ ભસ્મધૃક્પાવનઃ શુચિઃ ।
યઃ સ્નાતિ સ્નાનદશકૈર્વિધા બુદ્ધ્યાપિ માનવઃ ॥ ૧૮॥

ભસ્મસ્નાનાદિનિર્મુક્ત સોઽશુચિઃ સર્વકર્મણિ ।
પવિત્રં પરમેતદ્વૈ ભસ્મૈવ શ્રુતિચોદિતમ્ ॥ ૧૯॥

શ્રૌતાનલોદ્ભવં ભસ્મ મહાપાપનિવર્તકમ્ ।
મુક્તિદં જ્ઞાનદં પુંસામગ્નિરિત્યાદિમન્ત્રિતમ્ ॥ ૨૦॥

ભસ્મધૃત્વૈવ સન્ધ્યાયામધિકારી ન સંશયઃ ।
અધૃત્વા યદિ તદ્ભસ્મ સન્ધ્યાં કુર્યાદ્ દ્વિજાધમઃ ॥ ૨૧॥

ભસ્મધૃત્વા પુનઃ સન્ધ્યામાચરેત્સન્ધ્યયોર્દ્વયોઃ ।
શ્રાદ્ધં યજ્ઞસ્તથા હોમો વિવાહોપનયાદિકમ્ ॥ ૨૨॥

દેવતાભ્યર્ચનં નિત્યં કામ્યં સ્વધ્યાયતર્પણમ્ ।
સર્વં ભસ્મધૃગેવાશુ સર્વેષાં ફલમશ્નુતે ॥ ૨૩॥

સ તપસ્વી સદા પાત્રં સર્વાન્ત્સન્તારયેન્નરાન્ ।
ભસ્મધારણમન્ત્રેણ દુઃખં તરતિ માનવઃ ॥ ૨૪॥

અશુચિર્ભિન્નમર્યાદો ભસ્મધૃક્પાવનો ભવેત્ ।
અભક્ષ્યભક્ષણં કૃત્વા ગત્વાઽગમ્યામપિ દ્વિજઃ ॥ ૨૫॥

ભસ્મનઃ સ્નાનમાત્રેણ સર્વપાપૈઃ પ્રમુચ્યતે ।
વરાહં મૂષકં બાલમુન્મત્તં શ્વાનરાસભમ્ ॥ ૨૬॥

સ્પૃષ્ટ્વા દૃષ્ટ્વા દ્વિજો નિત્યં ભસ્મસ્નાનં સમાચરેત્ ।
ઉદક્ષીં સૂતિકાં દૃષ્ટ્વા યસ્તપસ્યતિ ભસ્મના ॥ ૨૭॥

ભસ્મસ્નાનેન પાપાનાં રાશિર્વૈભસ્મસાદ્ભવેત્ ।
ભસ્મધૃક્સર્વદા પૂજ્યો યથા(યતઃ) શિવમયો હિ સઃ ॥ ૨૮॥

સન્ધ્યયોરથ મધ્યાહ્ને નિશીથે ભસ્મધૃગ્ભવેત્ ।
સાચારોઽપિ દુરાચારો ભસ્મધૃક્પાવનો ભવેત્ ॥ ૨૯॥

ભસ્મત્રિપુણ્ડ્રસહિતો નિત્યમર્ચતિ શઙ્કરમ્ ।
તેન દત્તં જલં પત્રં સાક્ષાદ્ગૃહ્ણાતિ શઙ્કરઃ ॥ ૩૦॥

હવ્યં ગૃહ્ણન્તિ ચ સુરાઃ કવ્યં પિતૃગણાઃ સ્મૃતાઃ ।
ભસ્મધારણમાત્રેણ શમ્ભુસ્તસ્મૈ પ્રસીદતિ ॥ ૩૧॥

પ્રસાદઃ (પ્રસન્નઃ) શઙ્કરો યસ્મિન્મુક્તિસ્તસ્ય કરે સ્થિતા ।
દાનં યદ્દીયતે દાત્રા યો ગૃહ્ણાત્યપિ વૈ દ્વિજઃ ॥ ૩૨॥

ભસ્મધારણમાત્રેણ ઉભયોર્વર્ધતે ફલમ્ ।
પ્રાતઃ સ ત્યજ્યતે વિપ્રો ભસ્મનાઽઽપાદમસ્તકમ્ ॥ ૩૩॥

ત્રિપુણ્ડ્રધૃક્સમસ્તૈશ્ચ ચરિતૈર્નિશિ પાતકૈઃ ।
ત્રિયાયુષં ત્રિપુણ્ડ્રાઙ્કઃ રાત્રિપાપં વ્યપોહતિ ॥ ૩૪॥

મધ્યાહ્નેઽપિ તથા પ્રાતઃ પાતકૈઃ પ્રવિમુચ્યતે ।
સાયઙ્કાલે ભસ્મધારી અપરાહ્ણાદઘાત્સદા ॥ ૩૫॥

મુક્તો ભવતિ ગૌરીશપ્રિયકૃત્સ ભવિષ્યતિ ॥ ૩૬॥

ભસ્માભ્યક્તતનુર્ભવેદથ મહારુદ્રાક્ષમાલાધરો
રુદ્રાધ્યાયજપાદરઃ શિવમહાપઞ્ચાક્ષરે સાદરઃ ।
શ્રીમત્ ત્ર્યમ્બકપાદપઙ્કજવરે ધ્યાયન્વિમુક્તો ભવે-
ત્પાપૌઘાદ્ભવસાગરાદ્ધર મહાદેવાશ્રયાદ્ભાવતઃ ॥ ૩૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિકશ્યપપ્રોક્તં ભસ્મધારણમહિમાવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભીમાખ્યઃ અષ્ટમાંશઃ । અધ્યાયઃ ૯ । ૨-૩૭॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 9 . 2-37..

Notes:

Ṛṣi Kaśyapa ઋષિ કશ્યપ speaks to Garuḍa ગરુડ about BhasmadhāraṇaMahimā ભસ્મધારણમહિમા, especially in context of worship of Śiva શિવ.

Proofread by Ruma Dewan

*Rishikashyapaproktam Bhasmadharanamahimavarnanam*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*